# શ્રીશઙ્કરાર્યપદાવલમ્વ સુવર્ણમાલાસ્તુતિઃ

Shri Shankararyapadavalamva Suvarnamalastutih

sanskritdocuments.org

November 10, 2018

# Shri Shankararyapadavalamva Suvarnamalastutih

# શ્રીશઙ્કરાર્યપદાવલમ્વ સુવર્ણમાલાસ્તુતિઃ

## Sanskrit Document Information

Text title : shankarAryapadAvalamvasuvarNamAlAstutiH

File name : shankarAryapadAvalamvasuvarNamAlAstutiH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# શ્રીશઙ્કરાર્યપદાવલમ્વ સુવર્ણમાલાસ્તુતિઃ

(શ્રીકાલટિક્ષેત્રે)

ઓઙ્કારપઙ્કજમધુવ્રત વેદશીર્ષ-
કઞ્જાતબાલદિનનાથ કૃપાસમુદ્ર ।
વૃન્દારકેન્દ્રપદતૌચ્છ્યમનઃપ્રદાયિન્
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૧॥

નત્વા પદામ્બુજનિયુગ્મમહો યદાયં
વાચસ્પતિત્વમધિગચ્છતિ જન્મમૂકઃ ।
સ ત્વં કૃપાર્ણવ સરોરુહપત્રનેત્ર
શ્રીશઙ્કરાર્ય મમ દેહિ પદાબલમ્બમ્ ॥ ૨॥

મત્તો મનઃપ્રભવ એષ પુરા યદીય-
નેત્રાગ્નિનાઽઽપ તરસા ભસિતસ્વભાવમ્ ।
સ ત્વં વિરક્તિમચલાં પ્રવિતીર્ય મહ્યં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૩॥

શઙ્કાનિવારણપટો પ્રણતવ્રજસ્ય
યં કાલકાલ ઇતિ કુમ્ભભવો જગાદ ।
સ ત્વં વિતીર્ય પરમાયુરભીષ્ટપૂગં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૪॥

કન્યેવ રૂપગુણશાલિનમાદરેણ
મર્ત્યં પ્રમોદભરતઃ સ્વયમેવ મુક્તિઃ ।
યદ્વાક્સુધાપ્રણયિનં વૃણુતે હિ સ ત્વં
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૫॥

રાજાધિરાજપેદવીં તરસા પ્રયાતિ
યત્પાદપઙ્કજયુગં સકૃદેવ નત્વા ।
દીનાગ્રયામ્યપિ વિના કમપિ પ્રયત્નં

શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૬॥

યત્યગ્રયાયિજનતાવનબદ્ધદીક્ષ
તત્ત્વં પ્રબોધ્ય તરસા બહુલૈઃ સ્વકીયૈઃ ।
ગ્રન્થૈશ્ચ પૂર્ણકરુણાભરિતૈઃ કટાક્ષૈઃ
શ્રીશઙ્કરાર્ય મમ દેહિ પદાવલમ્બમ્ ॥ ૭॥

સ્તોત્રં ત્વદઙ્ઘ્રિકમલાલિતમાનસેન
સૂક્તં પઠેદ્ય ઇહ ભક્તિયુતાન્તરઙ્ગઃ ।
પાત્રં ભવેત્સ ખલુ સર્વસુખસ્ય સત્યં
ન દ્વાપરોઽત્ર વિષયે મનસાપિ કાર્યઃ ॥ ૮॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીશઙ્કરાર્યપદાવલમ્બસુવર્ણમાલાસ્તુતિઃ
સમ્પૂર્ણા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Shankararyapadavalamva Suvarnamalastutih*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*